# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा - तत्त्वाचार्यः ( एम.फिल् ) सेमेस्टर-१ प्रश्नपत्रम् - २ गुणाः - ७०**
**विषयः - पुराणेतिहासः समयः - ११-०२**
**दिनाङ्कः - २५.११.२०१६ ग्रन्थः - लिङ्गपुराणम् ( १तः१०८ अध्यायाः )**

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ पद्यद्वयस्य ससन्दर्भं सप्रसङ्गं विवेचनं कुरुत । ०८**

*(१) सर्वत्र सर्वदा ज्ञानं प्रतिभानुक्रमेण तु ।*
*श्रवणात्सर्वशब्दानामप्रयत्नेन योगिनः ॥*

*(२) भवान्सर्वस्य लोकस्य कर्ता त्वमधिदैवतम् ।*
*तदेवं स्वस्ति ते वत्स गमिष्याम्यंबुजेक्षणम् ॥*

*(३) तस्य तद्वचनं श्रुत्वा पुनः प्राह हरो हरिम् ।*
*प्रणिपत्य स्थितं मूर्ध्ना कृताञ्जलिपुटं स्मयन् ॥*

**प्रश्नः २ १. अष्टाङ्गयोगनिरूपणं विधीयताम् । ०८**

*अथवा*

*२. लिङ्गपुराणपरिचयं सविस्तरं लिखत ।*

**प्रश्नः ३ टिप्पणीद्वयं लिखत । ०४**

*(१) विष्णुप्रोक्तं महेश्वरस्तोत्रम् । (२) लिङ्गार्चनविधिः ।*
*(३) शिवपूजनमहिमा । (४) लिङ्गोद्भवः ।*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ४ एकस्य पद्यस्य ससन्दर्भं भावार्थं लिखत । ०४**

*(१) अहमग्निर्महातेजाः सोमश्चैषा महाम्बिका ।*
*अहमग्निश्च सोमश्च प्रकृत्या पुरुषः स्वयम् ॥*

*(२) भवतीह कलौ तस्मिञ्शयनासनभोजनैः ।*
*राजानः शुद्रभूयिष्ठा ब्राह्मणान् बाधयन्ति ते ॥*

**प्रश्नः ५** *१. शिवाराधनतः श्वेतस्य मृत्युविजयवर्णनं यथाग्रन्थं कुरुत ।* **०८**

*अथवा*

*२. कलियुगवर्णनं लिङ्गपुराणमाश्रित्य कुरुत ।*

**प्रश्नः ६ त्रयाणां लधूत्तराणि लिखत ०३**

*(१) शिवः त्र्यम्बकः कस्मात् ?*
*(२) कति वर्णाः आश्रमाश्च सन्ति ?*

(३) ब्राह्मण: कस्मात् द्विज: प्रोक्त: ?
(४) ''शूली'' नाम क: ? कस्मात् ?
(५) ''पार्वती'' इत्यस्य क: शाब्दिकोऽर्थ: ?

## तृतीयान्विति: ( युनिट - ३ )

**प्रश्न: ७** **कस्याप्येकस्य ससन्दर्भं विवेचनं कुरुत ।** ०४

(१) इत्येष एकचक्रेण सूर्यस्तूर्णे रथेन तु ।
हरितैरक्षरैरश्वै: सर्पतेऽसौ दिवाकर: ॥

(२) हा रुद्र रुद्ररुद्रेति रुरोद निपपात च ।
तं दृष्ट्वा भगवान् रुद्रो देवीमाह च शङ्कर: ॥

**प्रश्न: ८** १. ययातिचरितं सविस्तरं यथाग्रन्थं लिखत । ०८

अथवा

२. खगोलवर्णनं यथाग्रन्थं प्रतिपादयत ।

**प्रश्न: ९** **त्रयाणां उत्तराणि यच्छन्तु ।** ०३

(१) शिव: कस्मात् ''रुद्र:'' प्रोक्त: ?
(२) ''नीलकण्ठ:'' इत्यस्य कोऽर्थ: ?
(३) अरुन्धती का अवर्तत ?
(४) शङ्कर: कस्मात् ''हर:'' स्मृत: ?
(५) ''गिरिजा'' का कस्माच्च प्रोक्ता ?

## चतुर्थान्विति: ( युनिट - ४ )

**प्रश्न: १०** **एकस्य ससन्दर्भं सप्रसङ्गं विवेचनं कुरुत ।** ०४

(१) ब्राह्मणान् भोजयित्वा च यथा विभवविस्तरम् ।
धूम्रं गोमिथुनं दत्त्वा वायुलोके महीयते ॥

(२) अमृत: शाश्वत: शान्तो बाणहस्त: प्रतापवान् ।
कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनि: ॥

**प्रश्न: ११** १. लिङ्गपुराणप्रोक्तं गोदानमहत्त्वं प्रतिपाद्य सुवर्णाश्वदानं विवेचयत । १२

अथवा

२. शिवपूजनमहत्त्वं प्रतिपाद्य विविद्रव्यै: कृतानां यज्ञानां फलानि विवेचयत ।

**प्रश्न: १२** **टिप्पणीद्वयं लिखत ।** ०४

(१) अघोरेशस्य महिमा ।
(२) लिङ्गाख्यामूर्ति: उत्तमा ।
(३) गायत्रीजपमहिमा ।
(४) लिङ्गपुराणे पुराणलक्षणानि ।

=०=